(९६) शशास्तु (न शासददवादिगुण)

(२०) राद्धः ॥
(२३) दरीदृहीति। दरीदर्ति) दोदयीतो यङि ॥ दर्धर्ति। अदर्धद्। (लङि-तिपि०)

(२७) दरिद्रतेरल्लः ॥

(७)। अजीति। आजिहीते।

(१) दोद्युते। दिद्युते। 'द्युतिस्वाप्योः सम्प्रसारणम्' अद्योतिष्ट (द्युद्भ्यो लुङि) अद्युतत् (पुषादि द्युतादि०) अदिद्युतत्।

(४) गा गा (प्रेरणे) वध ।(परस्मैपदे कर्मणि) [सिस्वेदयिषति] (सः स्विदि स्विदि सहीनां च)

(११) भृशं शोभते भृशं रोचते स्यन्दते ऽनभि ख्याते। पदि ॥ का० ६.१.२५

(१३) नेषः ॥

(१५) नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ॥ सनीस्रस्यते ॥ सनीस्रंसीते ॥

(२०) सास्नाति। सास्नत्ति ॥ सास्नदः।

(२१) अवरीवृत्तोः। अवरीवृत्तुः ॥ वृद्भ्यः स्यसनोः। न वृद्भ्यश्चतुर्भ्यः ॥ विवृत्सति। अवर्त्स्यत् ॥ विवर्तिषते ॥

(२४) अस्यदत् लुङि ॥ अस्यन्त। अस्यन्दिष्ट ॥ सिस्यन्त्सति। सिस्यन्त्सते। स्विदेत्। सास्यन्ति ॥ सास्यन्दि ॥
(२५) (लुटि च कृपः) (कृपो रो लः) तासि च कृपः। कल्पता। कल्पिता ॥
चलीकल्प्य इत्येव [सिद्धीनां] [चरीकरीति] कृपो मकृत्वात् नेट् फलत्वान्तम् ॥
(२५) कल्पिष्यते। कल्प्स्यते। कल्प्स्यति। कल्पितासे। कल्प्तासि। चल्कल्पीते। चलीकृप्सति। चरीकृप्यते। चरीकृपीति
(३) अतस्मृ द्वत्वा 'अपप्रथत्' ॥ चरीकल्पि। चलीकृप्। अचरीकल्। अचकल्पत ॥
(२) विव्यथे। विव्यथिषते ॥ [व्यथो लिटि] (न सम्प्रसारणे सम्प्रसारणम्) ॥
(५) अरुरुच्० अमम्रदत्।
(६) अवस्कन्दति। परिस्कन्दति (स्कन्दिस्यन्दिपरिभ्यांच) इत्यनेन षत्वम् ॥ 'अपात् परिभ्यः' इति वा विकल्पः० ॥
(७) असाञ्जि। असाञ्जि (णौ चङ्युपधाया ह्रस्वः-न तस्यान्) इत्यनेन मिस्व सामर्थ्यादुपधायाः ऽपि दीर्घविकल्पो भवति इति कैयटः
(८) 'कृपेः सम्प्रसारणञ्च' 'कृपा'

(१२) कृपि कन्दि क्रन्दि (कन्दादीनां) भ्वादौ पाठः। णिच्युपधायाः दीर्घः। अत्र कदि क्रदि क्लदीनां माद्धृतमेऽपि पुनः पाठो चौरादिषु इति पुनरिहोपादानं न केवलमित्वार्थं कन्दनेन स्तेन ...दिषु पाठ सामर्थ्यान्न दीर्घविकल्पः ॥
✓ अकन्दि। अकान्दि। मित्त्व सामर्थ्यादि दीर्घ विकल्पः ॥

कल्कने । मह, पूजायाम् । रह, त्यागे । रहि गतौ । दृह, दृहि, बृह, बृहि, बृद्धौ । बृहि, शब्दे च । बृहिर् इत्येके । तुहिर्, दुहिर्, उहिर्, अर्दने, अर्ह, पूजायाम् ॥ इत्युदात्ता उदात्तेतः ॥

अथ द्युतादयः कृपूपर्यन्ताः त्रयोविंशतिरात्मनेभाषाः ॥

(१) द्युत, दीप्तौ । श्विता, वर्णे । ञिमिदा, स्नेहने । ञिष्विदा, स्नेहनमोचनयोः । ञिक्ष्विदा, चेत्येके । रुच, दीप्तावभिप्रीतौ च । घुट, परिवर्तने । रुट, लुट, लुठ, प्रतिघाते । शुभ, दीप्तौ । क्षुभ, संचलने । णभ, तुभ, हिंसायाम् 'णभ, अभावइत्येके । स्रंसु, ध्वंसु, भ्रंसु, अवस्रंसने । ध्वंसु, गतौ च । भ्रंशु, इत्यपि केचित् । स्रम्भु, विश्वासे । (२) वृतु, वर्तने । वृधु, वृद्धौ । शृधु, शब्दकुत्सायाम् । (३) स्यन्दू, प्रस्रवणे । (४) कृपू, सामर्थ्ये । (वृत्) * इति द्युतादय उदात्ता अनुदात्तेतः ॥

अथ घटादयस्त्वरत्यन्तास्त्रयोदशात्मनेभाषाः ॥

घट, चेष्टायाम् । (५) व्यथ, भयसंचलनयोः । प्रथ, प्रख्याने । प्रस, विस्तारे । म्रद, मर्दने । स्खद, स्खदने । क्षजि, गतिदानयोः । दक्ष, गतिहिंसनयोः । क्रप, कृपायां गतौ च । कदि, क्रदि, क्लदि, वैक्लव्ये । वैकल्य इत्येके ।

(१) द्युतिस्वाप्योःसम्प्रसारणम् । ७ । ४ । ६७ । संप्रसारणाच्च । ६ । १ । १०८ । द्युद्भ्यो लुङि । १ । ३ । ९१ । (२) वृद्भ्यःस्यसनोः । १ । ३ । ९२ । न वृद्भ्यश्चतुर्भ्यः । ७ । २ । ५९ (३) अनुविपर्यभिनिभ्यःस्यन्दतेरप्राणिषु । ८ । ३ । ७२ । (४) कृपोरोलः । ८ । २ । १८ । लुटिचक्लृपः । १ । ३ । ९३ । तासि च क्लृपः । ७ । २ । ६० । * संपूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ॥ (५) व्यथो लिटि । ७ । ४ । ६८ ।

कद्, क्रद्, क्लद्, इत्यन्ये। ञित्वरा, संभ्रमे ॥ इति घटादय उदात्ता अनुदात्तेतः ॥

अथ ज्वरादयः फणाअन्ताः सप्तपंचाशत् परस्मैभाषाः ॥

ज्वर, रोगे। गड, सेचने। हेड, वेष्टने। वट, भट, परिभाषणे। नट, नृतौ। ष्टक, प्रतीघाते। चक, तृप्तौ। कखे, हसने। रगे, शङ्कायाम्। लगे, संगे। ह्रगे, ह्लगे, षगे, ष्टगे, संवरणे। कगे, नोच्यते क्रियासामान्यार्थत्वात्। अनेकार्थत्वादित्यन्ये। अक, अग, कुटिलायां गतौ। कण, रण, गतौ। चण, शण, श्रण, दाने च। 'शण, गतावित्यन्ये। श्रथ, श्लथ, क्रथ, क्लथ, हिंसार्थाः। वन, च। वनु, च नोच्यते। ज्वल, दीप्तौ। ह्वल, ह्मल, चलने। स्मृ, आध्याने। दॄ, भये। नॄ, नये। श्रा, पाके। मारणतोषणनिशामनेषु ज्ञा। कम्पने, चलिः। छदिर्, ऊर्जने। जिह्वोन्मथने, लडिः। मदी, हर्षग्लेपनयोः। ध्वन, शब्दे। दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि, क्षपयश्च, इतिकेचित्। स्वन, अवतंसने। घटादयो मितः। जनीजॄष्क्नसुरञ्जोऽमन्ताश्च। ज्वलह्वलह्मलनमामनुपसर्गाद्वा। ग्लास्नावनुवमां च। न कम्यमिचमाम्। शमो दर्शने। यमो, परिवेषणे। स्खदिर्-अवपरिभ्यां च। (१) फण, गतौ। वृत् *। इति ज्वरादय उदात्ता उदात्तेतः

राजृ, दीप्तौ। उदात्तः स्वरितेदुभयतोभाषः ॥

टुभ्राजृ, टुभ्राशृ, टुभ्लाशृ दीप्तौ। उदात्ता अनुदात्तेत आत्मनेभाषाः ॥

(१) फणां च सप्तानाम्। ६। ४। १२५। * घटादिर्गणः समाप्तः।

इत्यत्र णिजन्तात् 'णिश्रिद्रुस्रुभ्यः' इत्यनेन 'चङ्' प्रत्ययो भवति। तेन 'अशिश्रियत्, अदुद्रुवत्, असुस्रुवत्' सिद्ध्यन्ति॥

(१६) तत्रायन्त। तातूर्ति। तातूर्तः। तात्वरति। कपमेतत्। (ज्वरत्वर०) त्वरयति। अतत्वरत्॥ (अत्स्मृ ६०)

(१) जाज्वरीति - जाजूर्ति। जाजूर्तः। इति (ज्वरत्वर०)

(२) छिद्यते॥ अजीछित्॥ द्वास्य विधान लाघवार्थ गुणो न भवति। अहि [illegible]। अही [illegible]॥

(१२) कण (शब्दे) रण (गतौ)

(२४) प्रवनयति। प्राबीवनत् (ग्लास्ना वनुवमां च)

(३२) स्मिङ् ईषद्धसने) सरीस्मयीति। असस्मीत्। असस्मयत्॥

(३६) पाकी वि [illegible]।

(५२) अनीक् [illegible] रत्येवं पठन्ति तन्मते [illegible] स्यन्दयति [illegible]।

(५७) पक्वाण - पोणत्ः [कणान्त सम्प्रान्त]

(६१) वा भ्राशभ्लाश भ्रमु०) भ्राश्यति भ्लाश्यति।

(५६) कल्पादौ प्राज्ञ प्राज्ञ् ईक्षाविति पठित्वा पुनरेक एव प्राज्ञ ईक्षा विकल्प प्राज्ञतेः धातोः के चित्तु
कर्मकृत्वा उच्यते क्रियास्मनेपदेषु पाठो नित्यमात्मनेपदार्थ एव। एवं चैतदुपपद्यते यदि कुत्रचित्
आत्मनेपदिनोऽपि परस्मैपदभाजो भवन्ति। अन्ये [illegible] राज्ञ [illegible] तस्यैव प्राज्ञतेः [illegible]
न [illegible] प्राज्ञ ईक्षाविति तेन [illegible] प्राक् [illegible] प्रयोजनं वदन्ति।
ते वां [illegible] अनुबन्ध [illegible] नित्यत्वज्ञापकम्. १ सौ० ६.१२४

(८) अत्र स्वाम्यादयः केचिदेतदन्तात् अयादय इति । केचिन्मतेन तु ध्वन्यन्ता इति ॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

(९) जलः । जडः । डलयोरैकत्व स्मरणात् ॥

(१३) जलः । जडः । डलयो०

(१४) हुल हिंसा संवरणयोः हल ।

(२०) [illegible] [illegible] [illegible] । [illegible]
([illegible])

(२४) [illegible]

(२५) [illegible] । [illegible]

(१) [illegible] सहिता – [illegible] । सासह्यते । [illegible]
(२) [illegible] । [illegible]
(१) [illegible] । सासह्यते [illegible]
(२) [illegible] । शाशाद्यि । शाशदि । [illegible]
(३) [illegible]

(६) [illegible] । [illegible]

(८) [illegible] । [illegible]

अथ स्यमादयः क्षुरत्यन्ताः षड्विंशतिः परस्मैभाषाः ॥

स्यमु, स्वनँ, ध्वनँ, शब्दे । षमँ, ष्टमँ, अवैकल्ये । ज्वलँ, दीप्तौ । चलँ, कम्पने । जलँ, घातने । टलँ, ट्वलँ, वैक्लव्ये । ष्ठलँ, स्थाने । हलँ, विलेखने । णलँ, गन्धे । बन्धन इत्येके । पलँ, गतौ । बलँ, प्राणने धान्यावरोधे च । पुलँ, महत्त्वे । कुलँ, संस्त्याने, बन्धुषु च । शलँ, हुलँ, (१) पत्लृँ, गतौ । क्वथेँ, निष्पाके । पथेँ, गतौ । मथेँ, विलोडने । टुवमँ, उद्गिरणे । (२) भ्रमु, चलने । क्षरँ, संचलने । इति स्यमादय उदात्ता उदात्तेतः ।

अथ द्वावनुदात्तेतौ ॥

(३) षहँ, मर्षणे । उदात्तोऽनुदात्तेत् ॥

रमुँ, क्रीडायाम् । अनुदात्तोऽनुदात्तेत् ॥

अथ षदादयः कसन्ताः सप्त परस्मैभाषाः ॥

(४) षद्लृँ, विशरणगत्यवसादनेषु । (५) शद्लृँ, शातने । (६) क्रुशँ, आह्वाने, रोदने च । कुचँ, संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । बुधँ, अवगमने । रुहँ, बीजजन्मनि प्रादुर्भावे च । कसँ, गतौ । कुचादय उदात्ता उदात्तेतो रुहिस्त्वनुदात्तः ॥ वृत् ॥ इति ज्वलादिगणः ॥

(१) लुङि—पतःपुम् ।७। ४ ।१९। (२) वा जॄभ्रमुत्रसाम् । ६ ।४। १२४। (३) सहिवहोरोदवर्णस्य । ६ । ३ । ११२ । सिवादीनां वाड्व्यवायेऽपि । ८ । ३ । ७१ । (४) पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ७ ।३।७८। लिटि—सदेः परस्य लिटि । ८ । ३ । ११८। (५) शदेः शितः । १ । ३ । ६० । (६) व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ८ । २ । ३६ ।

अथ हिक्कादयो गूहत्यन्ताः पञ्चचत्वारिंशदुभयतोभाषाः ॥

हिक्कँ, अव्यक्ते शब्दे । अञ्चुँ, गतौ याचने च । अचु, इत्येके, अचि, इत्यपरे । टुयाचृँ, याच्ञायाम् । रेटृँ, परिभाषणे । चतेँ, चदेँ, याचने । प्रोथृँ, पर्याप्तौ । मिदृँ, मेदृँ, मेधाहिंसनयोः । मिथृँ, मेथृँ, इत्येके । मिधृ, मेधृ, इत्यन्ये । मेधृ, संगमे च । णिदृँ, णेदृँ, कुत्सासन्निकर्षयोः । शृधुँ, मृधुँ, उन्दने । बुधिँर्, बोधने । उबुन्दिँर्, निशामने । वेणृँ, गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेनृ, इत्येके । (१) खनुँ, अवदारणे । चीवृँ, आदानसंवरणयोः । (२) चायृँ, पूजानिशामनयोः । व्ययँ, गतौ । दाशृँ, दाने । भेषृँ, भये । गतावित्येके । भ्रेषृँ, भ्लेषृँ गतौ । असँ, गतिदीप्त्यादानेषु । अषँ, इत्येके । स्पशँ, बाधनस्पर्शनयोः । लषँ, कान्तौ । चषँ, भक्षणे । छषँ, हिंसायाम् । झषँ, आदानसंवरणयोः । भ्रक्षँ, भ्लक्षँ, अदने । भक्ष, च । दासृँ, दाने । माहृँ, माने । (३) गुहूँ, संवरणे । इति हिक्कादय उदात्ताः स्वरितेतः ॥

अथाऽजन्ताः श्रिञादयो नयत्यन्ताः पञ्चोभयतोभाषाः ॥

श्रिञ्, सेवायाम् । उदात्तः स्वरितेत् । (४) भृञ्, भरणे । हृञ्, हरणे । धृञ्, धारणे । णीञ्, प्रापणे । इति भरत्यादयोऽनुदात्ताः स्वरितेतः ॥

(१) लिटि—गमहनजनखनघसांलोपःक्ङित्यनङि । ६ । ४ । ९८ । (२) चायः की । ६ । १ । ३५ । (३) ऊदुपधाया गोहः । ६ । ४ । ८९ । ढ्लोपे पूर्वस्य दीर्घोऽणः । ६ । ३ । १११ । लुङि—लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । ७ । ३ । ७३ । (४) ऋद्धनोः स्ये । ७ । २ । ७० । लिङि—रिङ् शयग्लिङ्क्षु । ७ । ४ । २८ । लुङि—ह्रस्वादङ्गात् । ८ । २ । २७ ।

(१) अस्थति। 'नाज्येशृङ्गाणाम्' अस्थात।
(४)

(२१) स्वन्दात्। स्कन्दात् (अनंसनस्वनतां सञ्झलोः) (ये विभाषा
(२२) उड्मा वित्वाद्यस्य यङ्लुगस्ति। अनुदितेक्के॥
(२३) चेक्रीयते (धाप- क्री) चेक्रीति।

(३०) पसति। पम्पस्यते (जपजभदह०)

(३३) चच्चास (चत्वमेत्वतुको सिद्धं वक्तव्यम्)।

(३६) धातुरवं पुरस्तौ पठ्यते - तत्रैव इत्यादिषु उदाहरणानि उपलभ्यन्ते। तस्मात् अत्र न पठनीयम्।

गुहिष्व- हु। जुगूढ्व॥ ढलोपे०॥

जुगुहे। जुगुहिव। जुगुह्म। जुगुहिष्व- हु। जुगूढ्व॥

(४०) गूहति (ऊदुपधाया गोहः) अगूहीत्। अघुक्षत्। अगूहिष्ट। अगूढ (लुङ्गा दुहदिह०) अगूढ॥ अघुक्षत। जुघुक्षति। सनि ग्रहगुहोश्च।

(काण्डि - हुमहिष - इत्यादि)

(१) शिश्लिषत। लुङि (अशिश्लिषत्) शिश्लिषुः॥ शिश्लीषति। शिश्लिक्षति (सनीवन्तर्धभ्रस्ज०)
(२) वर्ध (ऋतो नियमादनिट्त्वम्) वरिवर्ति (वृणात् (अद्भुतोः स्ये) हिङ् शयल्क (लिङ् इङ०) वृशीष्ट (उश्च) विवरिषति। वुवूर्षति (सनीवन्तर्ध०) वेव्रीयते (रीङ् ऋतः)

(३) हरति - हरते - जहार - जह्रे - जह्रिव - जह्रिम इति क्रादि नियमाद् इट्। जह्रिषे - जह्रिध्वे - ढ्वे जह्रिवहे - जह्रिमहे॥
(४) लिटि वरते रपि हरतिवत्॥

(७) दद्यात् । ददिथ । आ. धेयात् [लिङि] अदधत् । अधासीत् । धापयति [विदाजाधेर्...] (मत्स्यमानानीति)
(गातिस्थाघुपाभूभ्यः०) ॥ अधापि (आतो युक् चिण्कृतोः) धित्सति (सनि मीमा०) देधीयते (घुमा० ईत्)
दाधेति । दाधः । धेहि (घ्वसोरेद्धा०) । धेयात् (एर्लिङि) ॥

(२-३) ग्लायात् । ग्लायात् (वान्यस्य संयोगादेः) जाग्लेति । जाग्लाति । अग्लासीत् (ई घ्नाध्मोः) ग्लपयति । ग्लापयति
ग्लास्नावनुवमां च ।

(८-१०) निष्ठ्यासति । अतिष्ठपत् ।

जेगीयते - जगेयात् ।

(१६) गेयात् (गाङ्ग्रहणेऽविशेष) (अगासीत्) गातिस्था इत्यत्र (गापिबत्योर्ग्रहणम्)

(१८) श्रापयति (श्रा पाके) इति मित्त्वम् । अन्यत्र श्रापयति ।

(१९) पापयति (पाघ्रा०) इत्यत्र एकादेशे कृते ... शतिपारन्तर्धाने ... । पेयात् । पापयते
पाययति (शाच्छासाह्वा०युक्)
(२०)

(२१) अतिष्ठपत् ।

(२३) दापति पापयतिवत् ।

इत्यत्र लुगृहयुक्तो न प्रवर्तते (अङ्गवृत्तौ पुनर्वृत्ताव०) इत्यनया वा अकारान्तो अयमाद्युदन्तो निपात्यते ॥
(२४) पिबति (पाघ्राध्मा०) पेयात् - अपात् (एलिङि०) (गाति०) पाययति - ते (न पादम्या...)
(लोपः पिबतेरीच्चाभ्यासस्य०) अपीप्यत । अपापयत ।

जेघ्रीयते । (ईघ्राध्मोः)
(२५) जिघ्रति (पाघ्रा०) घ्रायात् । घ्रेयात् । घ्रापयति । अजिघ्रपत् । अजिघ्रिपत् । जघ्रतेर्वा ॥

(२६) धमति (पाघ्रा०) धी देध्मीयते (ईघ्राध्मोः)
तिष्ठासति [प्रातिष्ठिपत]
(२८) तिष्ठति । स्थेयात् । स्थापयति । अतिष्ठिपत् । तिष्ठेरित् । सदन्तविभन्द्रस्य । सन्निषेधते । सदास्थित [स्था ...
(२७) आमनति । मनेवत् ।
[३८ सर्वेषां ... गतौ वा ... चिन्त्यते । अन्यत्र सरति अनुजरीवेदमति ॥

(२८) यच्छति । अन्यत्र इदातिवत् ।

(३०) जहूर्ष । ह्वरति (गुणोऽर्तिसंयोगाद्योः) । ध्वतिह्वरिषीष्ट - ध्वतिह्वृषीष्ट । ध्वन्यह्वरिष्ट् । ध्वन्यह्वृत (ऋतश्च संयोगादेः)
(~~...~~) (न लिङि०) इति इट्दीर्घ निषेधः जुह्वूर्षति (अज्झनगमां०) जिह्वरिषति - रीर्षति -
इट्सनि वा । (जाह्वर्यते) गुणोऽर्तिसंयोगाद्योः ।

(३१) सस्वर्थ । सस्वरिथ (स्वरतिसूति०) (सस्वरिषति । सुस्वूर्षति (सनीवन्तर्ध०) सास्वर्यते । संयोगादित्वे
(विदि प्रच्छि स्वरतीनाम् ०) संस्वर्यते ।

(३२) सुस्मूर्षते (ज्ञाश्रुस्मृदृशां सनः) स्मरयति (घटादित्वात्) । असस्मरत् । स्मारयति मतान्तरे ॥ (अत्स्मृदृत्वर ०)

(३३) ससर्थ (आदिसु ...) । यदाऽयं सरतिर्वेगिते गमने वर्तते तदा धाव्, दिता शितस्यैवादेशो धावति इत्यादि ॥
(३४) ऋच्छति (पाघ्रा०) आरतुः (अरच्छ ऋताम्) आरिथ (इडत्यर्तिव्ययतीनाम्) अर्यात (गुणोऽर्तिसंयोगाद्योः) आर्षीत् ।
[सर्तिशास्त्यर्तिभ्यश्च०] इत्यङ् । विभाषा चिणि शास्ति । विद्यमान् एवा सास्यति यत्र ... अप्य विद्यमान् शाखे गृह्यते ॥ अरिरिषति
(स्मिपूङ्रञ्ज्वशां सनि०) (अरार्यते) (सूचिसूत्रि०) यकारपरत्वे रेफस्य ... निषेधो वक्तव्यः । अरर्ति । अरर्तिः । आर्यति
(ऋदोरप्) अर्यते (अर्पयति) आर्पिपत ॥ माध्यवान् अर्पिपत ॥

(३७) असुस्रुवत् (णि श्रि द्रु स्रु०) जिलि (असुस्रवत् - असिस्रवत्) स्रावयति (स्रुवति शृणोति०) पत्ने वदद् । अलावीत्
इति केचित् (असौषीत्)
(४०) शुश्रोथ [ऋकारादि नियमात् ...] । शुश्रूषते [ज्ञाश्रुस्मृ०] शृणु लोटि ॥ श्रावयति । अशिश्रवत् । अशुश्रवत् ॥
(४१) दुद्रोथ । अदुद्रुवत् (णि श्रि द्रु०) अदुद्रवत् । अदिद्रवत् ।
(४२) सर्वमिदं (क्रादि नियमः) ॥

(१) सस्मिषते ([स्मिपूङ्रञ्ज्वशां०]) विस्मापयते । असिष्मपत । निर्दिश्यते ॥ विस्मापयति ।
(२) मातेः । ... लिङि ।
(५) कोभूयते । चोभोति (न कवते यङि)

अथ धेटादयो जयत्यन्ताः षट्चत्वारिंशत्परस्मैभाषाः ॥

(१) धेट्, पाने । (२) ग्लै, म्लै, हर्षक्षये । द्यै, न्यक्करणे । द्रै, स्वप्ने । ध्रै, तृप्तौ । ध्यै, चिन्तायाम् । रै, शब्दे । स्त्यै, ष्ट्यै, शब्दसंघातयोः । खै, खदने । क्षै, जै, षै, क्षये । कै, गै, शब्दे । शै, श्रै, पाके । पै, ओवै, शोषणे । ष्टै, वेष्टने । ष्णै, वेष्टने । शोभायां चेत्येके । दैप्, शोधने । पा, पाने । घ्रा, गन्धोपादाने । ध्मा, शब्दाग्निसंयोगयोः । ष्ठा, गतिनिवृत्तौ । म्ना, अभ्यासे । दाण्, दाने । (३) ह्वृ, कौटिल्ये । स्वृ, शब्दोपतापयोः । स्मृ, चिन्तायाम् । ह्वृ, संवरणे । (४) सृ, गतौ । (५) ऋ, गतिप्रापणयोः । गृ, घृ, सेचने । ध्वृ, हूर्छने । स्रु, गतौ । (६) षु, प्रसवैश्वर्ययोः । (७) श्रु, श्रवणे । ध्रु, स्थैर्ये । दु, द्रु, गतौ । जि, ज्रि, अभिभवे । इति धेटादयोऽनुदात्ताः ॥

अथ स्मिङादयो डीङन्ता ङितः द्वाविंशतिरात्मनेभाषाः ॥

ष्मिङ्, ईषद्धसने । गुङ्, अव्यक्ते शब्दे । गाङ्, गतौ । कुङ्, घुङ्, उङ्, ङुङ्, शब्दे । उङ्, कुङ्, खुङ्, गुङ्, घुङ्, ङुङ्,

(१) आदेच उपदेशेऽशिति । ६ । १ । ४५ । लिटि—आत औ णलः । ७ । १ । ३४ । आतो लोप इटि च । ६ । ४ । ६४ । लिङि—दाधाघ्वदाप् । १ । १ । २० । एर्लिङि । ६ । ४ । ६७ । लुङि—विभाषा धेट्श्व्योः । ३ । १ । ४९ । विभाषा घ्राधेट्शाच्छासः । २ । ४ । ७८ । आतः । ३ । ४ । ११० ।—यमरमनमातां सक्च । ७ । २ । ७३ । (२) वाऽन्यस्य संयोगादेः । ६ । ४ । ६८ । (३) ऋतश्च संयोगादेर्गुणः । ७ । ४ । १० । लिङि—गुणोऽर्त्तिसंयोगाद्योः ७ । ४ । २९ । (४) लुङि—सर्त्तिशास्त्यर्त्तिभ्यश्च । ३ । १ । ५६ । ऋदृशोऽङि गुणः । ७ । ४ । १६ । (५) ऋच्छत्यॄताम् । ७ । ४ । ११ । इडत्यर्त्तिव्ययतीनाम् । ७ । २ । ६६ । (६) स्तुसुधूञ्भ्यः परस्मैपदेषु । ७ । २ । ७२ । (७) श्रुवः शृ च । ३ । १ । ७४ । हुश्नुवोः सार्वधातुके । ६ । ४ । ८७ ।

चेत्याहुरन्ये । च्युङ्, ज्युङ्, प्रुङ्, प्लुङ्, गतौ । क्लुङ्, इत्येके । रुङ्, गतिरेषणयोः । धृङ्, अवध्वंसने । मेङ्, प्रणिदाने । (१) देङ्, रक्षणे । श्यैङ्, गतौ । प्यैङ्, वृद्धौ । त्रैङ्, पालने ॥

इति ष्मिङ्प्रभृतयोऽनुदात्ताः ॥

पूङ्, पवने । मूङ्, बन्धने । डीङ्, विहायसागतौ ।

इति पूङादय उदात्ताः ॥

(२) तॄ, प्लवनसंतरणयोः । उदात्तः परस्मैभाषः ॥

अथ गुपादयो दूङ्त्यन्ताः अष्टावात्मनेभाषाः ॥

(३) गुप, गोपने । तिज, निशाने । (३) मान, पूजायाम् । बध, बन्धने । गुपादयश्चत्वार उदात्ता अनुदात्तेतः ॥

रभ, राभस्ये । डुलभष्, प्राप्तौ । ष्वञ्ज, परिष्वङ्गे । हद, पुरीषोत्सर्गे । रभादयश्चत्वारोऽनुदात्ता अनुदात्तेतः ॥

अथ ञिक्ष्विदादयो सेहत्यन्ताः पञ्चदश परस्मैभाषाः ॥

ञिक्ष्विदा, अव्यक्ते शब्दे । उदात्तः । स्कन्दिर्, गतिशोषणयोः । यभ, मैथुने । णम, प्रह्वत्वे शब्दे च । गम्लृ, सृप्लृ, गतौ । यम, उपरमे । तप, सन्तापे । त्यज, हानौ । षञ्ज, संगे । दृशिर्, प्रेक्षणे । दंश, दशने । कृष, विलेखने । दह,

(१) दयतेर्दिगि लिटि । ७ । ४ । ९ । स्थाघ्वोरिच्च । १ । २ । १७ । (२) वॄतो वा । ७ । २ । ३८ । लिङि—ऋत इद्धातोः । ७ । १ । १०० । लुङि—सिचि च परस्मैपदेषु । ७ । २ । ४० (३) गुप्तिज्किद्भ्यः सन् । ३ । १ । ५ । सन्यङोः । ६ । १ । ९ । (४) मानबधदानशान्भ्योदीर्घश्चाभ्यासस्य । ३ । १ । ६ ।

(१४) च्यावय[illegible] अचुच्यवत् । अचिच्यवत् ॥

(२६) पिपविषते । [स्मिपूङ्रञ्ज्वशां०]

(३०) तरति । तेरतुः — तेरिथ (ऋच्छत्यॄताम्) (तॄफलभजत्रपश्च) तरिता - तरीता [वॄतो वा] आ० तीर्यात् । अतारिष्टाम् । [सिचि च परस्मै०] ततरिषति - तितरिषति वा । तितीर्षति (इट् सनि वा) तेतीर्यते । तातर्ति । इत्यादि — व्यतितेरे [तॄफल०] व्यतितीर्षीष्ट । लिङ्सिचावात्मने०॥

(३१) जुगुप्सते । [अवयवे कृतं लिङ्गं तस्य विशेष०] गुपेर्निन्दने पदम् । सन्नन्तेभ्य एवैभ्यः निन्दाद्यर्थः अन्यत्र गोपायति - गोपयति ॥ निन्दा क्षमा व्याधिप्रतीकारेषु सन्निष्यते ॥

(३४) आरिप्सते [सनि मीमा०] आरारम्भीति [रभेरशब्लिटोः]
(३५) लम्भयति [लभेश्च] पूर्ववत् ॥
(३६) स्वजते [दंशसञ्जस्वञ्जां शपि] स्वजे [श्रन्थिग्रन्थि०]
(३७) सिष्विदे स्वेदयति (असिस्विदत्) सह स्विदि०॥
(४०) चस्कन्द । चस्कन्दिथ । अस्कदत् । अस्कान्त्सीत् । चनीस्कद्यते । [नीग्वञ्चु०]

(४२) अनंसीत् । [यमरमनमातां०] नमयति । नामयति [ग्लास्नावनु०] कर्मकर्तृ० अनंस्त दण्डः स्वयमेव । नमते दण्डः स्वयं० (न दुहस्नुनमां यक्चिणौ ।
(४३) गच्छति । जगाम । जग्मतुः । जगन्थ । जगमिथ । गमिष्यति [गमेरिट् परस्मै०] जिगमिषति । [illegible] समगत । समगंस्त [वा गमः] । सञ्जिगंसते [illegible] दीर्घो न भवति गमिरित्यादेशग्रहणात्
(४४) [अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्] त्रप्ता - तर्प्ता ।
(४५) यच्छति । अयंसीत् [यमरम०] यमोऽपरिवेषणे । यमयति । अन्यत्र यामयति वा [न पादम्याङ्यमा०]
(४६) सजति [दंश सञ्ज०]
(४७) पश्यति । ददर्शिथ - दद्रष्ठ । [सृजिदृशो०] [विभाषा सृजिदृशोः] अदर्शत् [ऋदृशोऽङि गुणः] (दिदृक्षते ([ज्ञाश्रुस्मृदृशां])
(५०) दशति । दन्दश्यते । [लुपसद०] [जपजभदहदश०] इत्यत्र नकारलोपपाठात् यङ्लुकि [illegible] न लोपः । दन्दशीति ।
(५१) अकृक्षत् [शल इगुपधा०] [स्पृशमृशकृष०] अक्राक्षीत् ॥
(५२) देदिश्य । [illegible] । [दादेर्धातोर्घः] अधाक्षीत् [दंदशे०] दशतिवत्

आह यावदेव तु मौञ्जादि कस्य मौञ्जे दि निक्षायार्थ किल्ब कुन्तले॥
उदुम्बिर उदुम्बिरवान् । वाक्य ३०।।४।१८॥

(५३) भेजतु। [ननेहिणा | निमानि | अनि गत —

(९) पिपक्षति।

(८) [तृफलभजत्रपश्च] भेजतुः भेजुः।

(९) रज्यति। अरीरजत्। [रञ्जेर्णौ मृगरमणे इति वक्तव्यम्] इति नकारलोपः। अन्यत्र रञ्जयति॥
कर्मणि [illegible] [कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च] रज्यति वस्त्रं स्वयमेव। श्यन् [illegible] परस्मैपदं भवति॥

(१०) यजति। इयजिथ। [वचिस्वपियजादीनां किति] यियक्षति।

(११) उवोढ [सहिवहोरोदवर्णस्य] [लिट्यभ्यासस्यो०] उह्यात्।

(१३) वत्स्यति (सः स्यार्धधातुके) (वसतेर्लुङि रात्रिशेषे जागरणसन्ततौ वक्तव्यः) मा वात्सीः। अजुग्ना वात्सीः॥
वासयति। वासयते [न पादम्या०] उवास

(१४) उवाय। ऊयतुः-ऊयुः। [लिटि वयो यः]। उवाय। ऊवतुः। ऊवुः। [वश्चास्यान्यतरस्यां किति]॥
ऊये। ऊयाते। ऊवे। ववौ। ववे। ऊयात्। अवासीत्।

(१५) व्ययति-ते। विव्याय। विव्ये। [न सम्प्रसारणे सम्प्रसारणम्] [न व्यो लिटि] वेवीयते। [illegible]
व्याययति (शाच्छासाह्वाव्यावेपां०)

(१६) जुहाव [अभ्यस्तस्य च]। जुहुवे। हूयात्। अहुत् [लिपिसिचिह्वश्च] (आत्मनेपदेष्वन्यतरस्याम्) अहूत। अह्वास्त॥
जुहूषति। जोहूयते। जोहवीति। जोहोति। प्रकृतिग्रहणन्यायेन [illegible] ह्वः इति सम्प्रसारणम् [illegible]
भवति। ह्वाययति। अजूहवत् [ह्वः सम्प्रसारणम्]॥ [illegible] [लिपिसिचिह्वश्च]
ह्वे अजोहुवत्। अजोहुवताम्। अजोहुवन्।

भस्मीकरणे । मिह, सेचने । स्कन्दादयोऽनुदात्ताः । इति खिदादय उदात्तेतः ॥

अथैकः परस्मैभाषः ॥

(१) कित, निवासे रोगापनयने च । उदात्तेत ॥

अथ द्वावुभयतोभाषौ ॥

(२) दान, खण्डने । (३) शान, तेजने । स्वरितेतौ ॥

अथ पचादयो वहत्यन्ता नवोभयतोभाषाः ॥

डुपचष्, पाके । षच, समवाये । भज, सेवायाम् । (४) रञ्ज, रागे । शप, आक्रोशे । त्विष, दीप्तौ । (५) यज, देवपूजासंगतिकरणदानेषु । डुवप, बीजसन्ताने छेदने च । वह, प्रापणे ॥ इति पचादयोऽनुदात्ताः स्वरितेतः सचतिस्तूदात्तः ।

अथैकः परस्मैभाषः ।

(६) वस, निवासे । उदात्तेदनुदात्तः ।

अथ व्येञादयस्त्रय उभयतोभाषाः ।

(७) वेञ्, तन्तुसन्ताने । (८) व्येञ्, संवरणे । (९) ह्वेञ्, स्पर्द्धायां शब्दे च । व्येञादयोऽनुदात्ताः ।

---

(१) संशये प्रायेणायं विपूर्वः । अस्यानुदात्तेत्त्वमाश्रित्यकेचित् " चिकित्सते " इत्युदाहरन्ति । (२) अर्थविशेषे सन्निष्यते ।३।१।६। (३) अर्थविशेषे सन्निष्यते । (४) रञ्जेश्च । ६ । ४ । २६ । (५) लिटि—लिट्यभ्यासस्योभयेषाम् । ६ । १ । १७ । वचिस्वपियजादीनां किति । ६ ।१। १५ । (६) शासिवसिघसीनां च । ८ । ३ । ६० । (७) लिटि—वेञो वयिः । २ । ४ । ४१ । ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च । ६ । १ । १६ । लिटि वयो यः । ६ । १ । ३८ । वश्चास्यान्यतरस्यां किति । ६ ।१। ३९ । वेञः । ६ । १ । ४० । (८) न व्यो लिटि । ६ । १ । ६४ । (९) लिटि—अभ्यस्तस्य च ।६। १। ३३ । लुङि—लिपिसिचिह्वश्च ।३ । १। ५३ । आत्मनेपदेष्वन्यतरस्याम् । ३ । १ । ५४ ।

अथ द्वौ परस्मैभाषौ ।

वद[1], व्यक्तायां वाचि । (१) टुओश्वि[2], गतिवृद्ध्योः । इत्युदात्तौ । वृत् । इति यजादिर्गणः समाप्तः । भ्वादिस्त्वाकृतिगणः । तेन चुलुम्पतीत्यादि संग्रहः । (२) ऋति, सौत्रो धातुः ।

इति शब्विकरणा भ्वादयः ॥

अथाऽदादिर्गणः ॥

अथ द्वौ परस्मैभाषौ ।

(३) अद[1], भक्षणे । (४) हन[2], हिंसागत्योः । अनुदात्तावुदात्तेतौ ॥

अथ चत्वार उभयतोभाषाः ।

(५) द्विष[3], अप्रीतौ । (६) दुह[4], प्रपूरणे । दिह[5], उपचये । लिह[6], आस्वादने । द्विषादयोऽनुदात्ताः स्वरितेतः ।

---

(१) लिटि—विभाषा श्वेः । ६ । १। ६० । लुङि—श्वयतेरः ।७। ४ । १८ । (२) ऋतेरीयङ् । ३ । १ । २९ । (३) अदिप्रभृतिभ्यः शपः । २ ।४। ७२ । बहुलं छन्दसि । २।४। ७३ । लिटि—लिट्यन्यतरस्याम् । २ । ४। ४०। लोटि—हुझल्भ्यो हेर्धिः । ६ ।४। १०१ । लङि—अदः सर्वेषाम् ।७। ३ । १०० । लुङ्सनोर्घस्लृ । २।४। ३७ । (४) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति । ६ । ४ । ३७ । वमोर्वा ।८। ४ ।२३। हो हन्तेर्ञ्णिन्नेषु ।७।३।५४ । अभ्यासाच्च ।७। ३ । ५५ । लोटि—हन्तेर्जः । ६ । ४ । ३६ । आ० लिङि—हनो वध लिङि ।२। ४ ।४२। लुङि च ।२। ४ । ४३ । (५) लङि—द्विषश्च ।३ ।४। ११२ । (६) दादेर्धातोर्घः ।८। २। ३२ ।

(१) वदति । उवाद । ऊदतुः (लिट्यभ्या०) उद्यात् । अवादीत् । वादयति । वादयते (अवीवदत् वीणाम्)।

(२) श्वयति । शुशाव । शुशुवतुः । (विभाषा श्वेः) शिश्वाय । शिश्वियतुः । [श्वयते लिट्यभ्यासस्य] सम्प्रसारणं प्रति षेधः । अश्वत् । अश्वयीत् । अशिश्वदत् । [ऋदृशोऽङि गुणः] [विभाषा धेट्श्व्योः] (श्वयतेः श्वल) इति वृद्धिनिषेधः ॥ शोशूयते [विभाषा श्वेः] । णिचि (अशूशवत् (अशिश्वयत्) (णौ च संश्चङोः) यङ्लुकि (विभाषा श्वेः) इति सम्प्रसारणं लुका विकल्पत्वात् राष्ट्र भवति । लुङि शोशुवीति ... अन्तरङ्गो । (अशोशिवयत्) नि ॥

(३) ऋतीयते । (ऋतेरीयङ्) ऋतीयां चक्रे । आनृते । ऋतीयिता । अर्तिता । आर्तीयिष्ट । आर्तिष्ट । ऋतितीयिषते । अर्तितिषते । अजादित्वान्न यङ्लुकौ । ऋतीययते । ति । अर्तयते - ति ॥ मा ऋतितीयत् । मा अर्तितत् ॥ इत्ये भ्वादयः ॥

॥ अथाऽदादिगणः ॥

(१) लटि । अत्ति । लिटि :- आद - जघास, जक्षिथ । लुटि । अत्ता । लृटि, अत्स्यति । लोटि । अत्तु, अद्धि । लङि आदत् । लिङि अद्यात् । आ. लि. बध्यात् । लुङि अघसत् । सनि जिघत्सति । णिचि आदयते - ति देवदत्तेन । अदेः प्रतिषेधो वक्तव्यः " आशिताशीः ... ॥

(२) लटि - हन्ति, घ्नन्ति । लिटि जघान, जघ्नतुः । लुटि - हन्ता । लृटि हनिष्यति । लोटि हन्तु - हतात् (जहि) । लङि. अहन् । लि. हन्यात् । आ. लि. वध्यात् । लु. अवधीत् । लृ. अहनिष्यत् । सनि - जिघांसति । यङि " नीं. हन्तेर्हिंसायां घ्नी भावो वक्तव्यः " जेघ्नीयते - जङ्घन्यते । यङ्लु. जङ्घनीति - जङ्घन्ति केचित् जङ्घतः । आङो यमहनः " [आजघ्ने । आवधिषीष्ट (हनो वधलिङि । आजङ्घनिष्ट ॥ कर्मणि भावे च ॥ ... घातयते इत्यत्र हन्तेर्हिंसायामिति भावकर्म । इति णिच्यपि दिद्धि ... । आ. लि. वधिषीष्ट - वधिषीष्ट, लुङि. अवधि ... । यङि. जेघ्नीयते [हन्तेर्हिंसायां घ्नीभावो वक्तव्यः] ...
' ... सीयुटि विप्रतिषेधेन ... वधिषीष्ट ॥ कर्मकर्तरि । आहते माणवकः स्वयमेव । मकुचिणोः प्रति ...] आवधिषीष्ट स्वयमेव ॥

(३) लटि - द्वेष्टि - द्वेक्षि । लिटि - दिद्वेष - दिद्वेषिथ । लुटि । द्वेष्टा । लृटि । द्वेक्ष्यति । लोटि - द्वेष्टु - द्विड्ढि । लङि - अद्वेट् - अद्विषुः - अद्विषन् । वि. लि. द्विष्यात् । आ. लि. द्विक्ष्यात् । लु. अद्विक्षत् । आ. द्विष्टे । दिद्विषे । द्विक्षु । अद्विक्षत ॥ सनि - दिद्विक्षति - ते । यङि. - देद्विष्यते । यङ्लुकि - देद्विषीति - देद्वेष्टि - लङि अदेद्विषन् - षुः ॥ णिचि - द्वेषयति - अदिद्विषत् ॥ कर्मणि ÷

(४) लटि - दोग्धि - धोक्षि । लिटि - दुदोह - दुदोहिथ । लुटि - दोग्धा । लृटि - धोक्ष्यति । लो. दोग्धु - दुग्धि । लङि - अधोक् । वि. लि. दुह्यात् । लुङि - अधुक्षत् । आ. दुग्धे - धुक्षे । दुदुहे - दुदुहाते - धुग्ध्वे । लोटि - धुक्ष्व । दुहीत । धुक्षीष्ट । अधुक्षत - अधुक्षाताम् । सनि - दुधुक्षति - ते । दोदुह्यते । य. लु. दोदुहीति - दोदोग्धि । अदोदोहीत् । णि. दोहयति - अदूदुहत् ॥ कर्मणि ÷ दुह्यते, क. क. दुग्धे । अदोहि - क. अदोहि - अदुग्ध । यङ्लु. अदोदोहि - अदोदुग्ध ।

(५) लटि - देग्धि - धेक्षि । लिटि - दिदेह - दिदेहिथ । लुटि देग्धा । लृ. धेक्ष्यति । लो. देग्धु - दिग्धि । लङि - अधेक् । वि. दिह्यात् । लुङि अधिक्षत् । आ. दिग्धे - धिक्षे । लुङि अधिक्षत - अधिक्षाताम् । दिहीत । धिक्षीष्ट । सनि । दिधिक्षति - ते । यङि. देदिह्यते । देदिहीति - देदेग्धि । णिचि । देहयति - अदीदिहत् ।
कर्मणि ÷ दिह्यते । क. क. दुहवत् ॥ लुङि ।

(६) लटि लेढि - लीढः । लिलेह - लिलेहिथ । लु. लेढा । लृ. लेक्ष्यति । लो. लेढु - लीढि । लङ् अलेट् । वि. लिह्यात् - लुङि - अलिक्षत् । आ. लीढे - लिक्षे । लि. लिलिहिषे - लिलिहिढ्वे - ध्वे । लिहीत - लिक्षीष्ट । लु. अलिक्षत - अलिक्षाताम् । सनि - लिलिक्षति - ते । यङि. दुहवत् + यङ्लुकि दुहवत् ॥ णिचि दुहवत् ॥
कर्मणि दुहवत् - .

(१) आ+चष्टे – चक्षे [illegible] – चष्टे । [illegible] ख्याता [illegible] । [illegible]
[illegible] ख्याता + क्शा + [illegible] । [illegible] पद्धति [illegible] चलकारे [illegible] । [illegible]
[illegible]

(२) ईर्ते – ईराञ्चक्रे । ईरिरिषते । ईरयते – ति – मा भवान् ईरिरत् ॥ कर्मादि – ÷

(२) ईड्टे – ईडिषे – ईड्ढ्वे – ईडाञ्चक्रे । पूर्ववत् ॥ [illegible]

(३) ईष्टे – ईशिषे – ईड्ढ्वे – ईशाञ्चक्रे । पूर्ववत् ॥

(४) आस्ते – आस्से – आध्वे – आद्ध्वे । आसाञ्चक्रे । आसयते – मा भवानासिसत् ॥ कर्मादि –

(५) आशास्ते – आशाशासे – । आशिशासिषते । आशाशास्यते – आशाशास्ति – आशाशाधि – हि । आशासयति – आशीशसत् ।

(६) वस्ते – वध्वे – ध्वे । ववसे – अवसिष्ट्वम् । विवत्सिषते । वावस्यते – वावस्ति – वावद्धि – हि । वासयति – अवीवसत् ।

(७) कंसे – कन्ध्वे । चकंसे – चिकंसिषते । चाकंस्यते – चाकंसीति – अचाकन् । कंसयति – अचकंसत् । कर्मादि –

(८) कसिर्वत्सिवत् ॥

(९) कष्टे, कक्षे, कड्ढ्वे । पूर्ववत् ॥

(१०) णिंस्ते – णिन्ध्वे । निणिंसे । निणिंसिषते । नेनिंस्यते – नेनिंसीति – अनेनिन् । णिंसयति – अणिणिंसत् । कर्मादि –

(११) णिङ्क्ते – णिङ्क्षे । पूर्ववत्

(१२) णिजिः पूर्ववत् ।

(१३) पिजिः पूर्ववत् ।

(१४) वृक्ते – वृक्षे । ववृजे । वरीवृज्यते । वरीवृजीति – वरिवृक्ति – लोट् – अवरीवृजीत् – वर्क् । वर्जयति – अवीवृजत् ॥ कर्मादि –

(१५) पृजी पूर्ववत् ॥

(१६) पृची पूर्ववत् ॥

(१७) सूते – सूध्वे । सुषुवे । सविता – सोता [स्वरति सूति ७-२-४४] सुसूषते सुसविषते । सोषूयते । सोषुवीति – सोषूति [भूसुवो ७-३-८८] प्रकृतिग्रहणं यङ्लुगर्थम् । सावयति – असूषवत् । कर्मादि – सुद्दे – सविता – साविता – सोता – लुङ् – असावि – असविष्ट – असाविष्ट – असोष्ट । लुङ् – असोसावि – असोसविष्ट – असोसाविष्ट । एवं षङि ।

(१८) शेते – शयाते – शेरते [शीङो रुट्] शिश्ये । शिशयिषते । शाशय्यते [अयङ् यि क्ङिति] शेशयीति – शेशेति – शेशीतः । शाययति अशीशयत् ॥ कर्मादि – शय्यते । शायिता – शयिता । एवं सर्वत्र ॥ अण्डदे शकानि (गणकार्यमनित्यम्)

(१९) यौति । युयाव । युयविषते – युयूषते । [सनि ग्रहगुहोश्च ७-२-१२] योयूयते – योयवीति – योयोति । यावयति – अयीयवत् । ७-४-८०

(२०) रौति – रवति – रुवीति । रुराव । रूरुवति । [सनि ग्रहगुहोश्च] रोरूयते । रोरवीति – रोरोति – रोरुवीतः । राययति – अरीरवत् ॥

(२०) नौति नियौति वत् ॥ नावयति – अनूनवत् ।

(२१) क्षौति – चुक्षाव – यौतिवत् ॥

(२२) क्ष्णौति – चुक्ष्णाव । यौतिवत् ॥

(२३) ऊर्णौति । ऊर्णोति [ऊर्णोतेर्विभाषा] । ऊर्णुते – । ऊर्णुनाव । ऊर्णुनुवे । ऊर्णविता – ऊर्णुविता [विभाषोर्णोः] ऊर्णुनविषते – ऊर्णुनूषते [सनीवन्तर्ध] ऊर्णोनूयते । ऊर्णोनौति – ऊर्णोनोति – । ऊर्णावयति । और्णुनवत् ॥
• वान्य ऊर्णोर्नुभावः यङ् प्रसिद्धिः प्रयोगतः ।
• आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

[illegible]

अथैक आत्मनेभाषः ॥

(१) चक्षिङ्, व्यक्तायां वाचि । अयं दर्शनेऽपि ।

अथ पृच्यन्ताः षोडशात्मनेभाषाः ।

ईर, गतौ कम्पने च । ईड, स्तुतौ (२) ईश, ऐश्वर्ये । आस, उपवेशने । आङः शासु, इच्छायाम् । वस, आच्छादने । कसि, गति, शासनयोः । कस इत्येके । कश, इत्यन्ये । णिसि, चुम्बने । णिजि, शुद्धौ । सिजि, अव्यक्ते शब्दे । पिजि, वर्णे । पृजीत्येके । वृजी, वर्जने । पृची, संपर्चने । इतीरादय उदात्ता अनुदात्तेतः ॥

अथ द्वावात्मनेभाषौ ॥

षूङ्, प्राणिगर्भविमोचने । (३) शीङ्, स्वप्ने । उदात्तौ ।

अथ पञ्च परस्मैभाषाः ॥

(४) यु, मिश्रणेऽमिश्रणे च । (५) रु, शब्दे । णु, स्तुतौ टुक्षु, शब्दे । क्ष्णु, तेजने । इत्युदात्ताः ॥

अथैक उभयतोभाषः ॥

(६) ऊर्णुञ्, आच्छादने । उदात्तः ॥

(१) चक्षिङःख्याञ् । २ । ४ । ५४ । लिटि—वा लिटि । २ । ४ । ५५ । वा०—ख्शादिर्वा । २ । ४ । ५४ । वा०—असिद्धे शस्य यवचनं विभाषा । लुङि—अस्यतिवक्तिख्यातिभ्योऽङ् । ३ । १ ५२ । वा०—वर्ज्जने प्रतिषेधः । २ । ४ । ५४ । (२) ईशः से । ७ । २ । ७७ । ईड्जनोर्ध्वे च । ७ । २ । ७८ । (३) शीङः सार्वधातुके गुणः । ७ । ४ । २१ । शीङो रुट् । ७। १ । ६ । (४) उतोवृद्धिर्लुकि हलि । ७ । ३। ८९। (५) तुरुस्तुशम्यमः सार्वधातुके । ७ ।३। ९५। (६) ऊर्णोतेर्विभाषा ।७।३ । ९० । वा०—ऊर्णोतेराम्नेतिवाच्यम् । नन्द्राः संयोगादयः । ६ । १ । ३ । विभाषोर्णोः । १ । २ । ३ । गुणोऽपृक्ते । ७ । ३ । ९१ । ऊर्णोतेर्विभाषा । ७ । २ । ६।

अथ पञ्च परस्मैभाषाः ॥

ष्णु, प्रस्रवणे । ध्यु, अभिगमने । (१) षु, प्रसवैश्वर्ययोः । कु, शब्दे । इत्यनुदात्ता उदात्तेतः ॥

अथ द्वावुभयतोभाषौ ॥

ष्टुञ्, स्तुतौ ॥ (२) ब्रूञ्, व्यक्तायां वाचि । इत्यनुदात्तौ ॥

अथैकोनविंशतिः परस्मैभाषा इङ्त्वात्मनेभाषः ॥

(३) इण्, गतौ । (४) इङ्, अध्ययने । (५) इक्, स्मरणे । वी, गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । (६) या, प्रापणे । वा, गतिगन्धनयोः । भा, दीप्तौ । ष्णा, शौचे । श्रा, पाके । द्रा, कुत्सायां गतौ । प्सा, भक्षणे । पा, रक्षणे । रा, दाने । ला, आदाने । दाप्, लवने । (७) ख्या, प्रकथने । प्रा, पूरणे । मा, माने । (८) वच, परिभाषणे । इत्यनुदात्ता उदात्तेतः ॥

(१) लुङि—स्तुसुधूञ्भ्यः परस्मैपदेषु । ७ । २ । ७२ । (२) लटि—ब्रुवः पञ्चानामादित आहो ब्रुवः । ३ ।४ । ८४ । आहस्थः । ८ । २ । ३५ । ब्रुव ईट् ।७। ३ । ९३ । ब्रुवो वचिः । २ ४ । ५३ । लुङि—वचउम् ।७ ।४। २० । छान्दसलिङि—लिङ्याशिष्यङ् । ३ । १ । ८६ । छन्दस्युभयथा । ३ । १। ११७ । इष्टिः—स्यागागमिवचिविदिशकिरुहयः प्रयोजनम् । (३)—इणो यण् ।६।४ । ८१ । दीर्घ इणः किति ।७। ४। ६९ । लिङि—एतेर्लिङि । ७ ।४। २४ । लुङि—इणो गा लुङि । २।४। ४५ । (४) नित्यमधिपूर्वः । लिटि—गाङ्लिटि । २ । ४ । ४९। लुङ्लृङोः—विभाषालुङ्लृङोः । २ । ४ । ५० । गाङ् कुटादिभ्योऽञ्णिन्ङित् । १। २। १। घुमास्थागापाजहातिसां हलि ।६ । ४ । ६६। (५) अयमप्यधिपूर्वः । वा०—इण्वदिक इति वक्तव्यम् । (६) लङि—लङः शाकटायनस्यैव ।३।४। १११। (७) इष्टिः—अयं सार्वधातुकमात्रविषयः । (८) अयमन्तिपरो न प्रयुज्यते । बहुवचनपर इत्यन्ये । झिपरइत्येके

(१) स्नौति – सुष्णाव – स्नाविष्यति [स्तुक्रमोः ...] अस्नौत् – अस्नावीत् – सुस्नूषति – सुस्नूषति – सु सोष्णूयते – सोष्णवीति। स्नावयति – असुष्णवत्॥ कर्मादिषु ... विशेषः [न दुस्सुन्तमां मद्कर्मिणौ] प्रस्नुते – प्रास्नोष्ट॥

(२) यौति – दुद्याव। दुद्यूषति – दोद्योति – दोद्यवीति। द्यावयति – अदुद्यवत्॥
[असावीत् इति ...]

(३) क्षौति वत् – लुङि – अक्षौषीत् [स्तुसुधूञ्भ्यः परस्मैपदेषु] ... 'सुञ् धूञो' ... अभिधेये ...

(४) कौति : पूर्ववत्॥ क्नते ... न प्रवर्तते शितप्‌निर्देशात्]

(५) तौति रौतिवत् [तुरुस्तुशम्यमः सार्वधातुके]

(६) स्तौति – तु दस्मैपदेषु तौतिवत् [तुरुस्तुशम्यमः सार्व॰] तुष्टाव – तुष्टूषति। तोष्टूयते। तोष्टवीति – स्तावयति – अतुष्टवत्॥

(७) ब्रूते – ब्रुवाते – ऊचे – ऊचाते – अवोचत। ब्रवीति [ब्रुव ईट्] आह – आहतुः [ब्रुवः पञ्चानामादित आहो ब्रुवः] आत्थ] उवाच – ऊचतुः। अवोचत् – ... विवक्षति – वावच्यते। यङ्लुक्न भवति ... वाचयति – अवीवचत्]

(८) एति – इयन्ति। इयाय – ईयतुः [दीर्घ इणः किति] ईयात् [...] ... अगात् [इणो गा लुङि] [...] जिगमिषति गमयति – अजीगमत्॥ [णौ गमिरबोधने] कर्मादिषु – अगामि – अगामिषाताम् [...] अन्ये तु आयिषातामित्यादि॥

(९) अधीते – अधीयाते। अधिजगे [गाङ् लिटि] अध्यैत। अधीयीत। अध्येषीष्ट। अध्यैष्ट [विभाषा लुङ्लृङोः] अध्यगीष्ट – अध्यगीषाताम्। [इङश्च] अधिजिगांसते॥ अधिजिगमिषाम्... [आत्मनेपदेन समानपदस्थस्य ...] ... परस्मैपदेषु ... अधिजिगांसिता ... अध्यापिपत्॥

(१०) अध्येति – अधीयन्ति – अधियन्ति [इणवदिकः ...] 'अत्र विषये मतद्वयम्। केचन आर्धधातुकप्रकरणे वार्तिकं मन्यन्ते। अत्र विषये एव इणवत् भवति अन्ये तु इणवत् ... कार्यं तत्सर्वं इणवद् इच्छन्ति।

(११) वेति – वियन्ति। विवाय – अवैषीत् [...] वेवीयते – वेवेति – वेवयीति। विवीषति। वाययति – वाययति [प्रजने वी...]

(१२) याति – ययौ। अयासीत् [यमरमनमातां सक् च] लङि अयुः। अयान् [लङः शाकटायनस्यैव] यियासति। यायायते यायेति – यायाति। यायीतः [ईहल्यघोः] यायति [...] यापयति – अयीयपत्॥ कर्मादिषु –

(१३) वाति यातिवत्। णिचि वाजयति [वो विधूनने जुक्]

(१४) भाति वत् – –:

(१५) ष्णाति वत्। आ. लिङि स्नेयात् [वान्यस्य संयोगादेः॥

(१६) श्रातिवत् – श्रपयति [ज्वलादि...] श्रापयति। एवं द्रा – प्सा – प्रा वेदितव्याः॥

(१७) पाति पूर्ववत्। णिचि [पातेर्लुग्वक्तव्यः] पालयति।

(२१) लाति पूर्ववत्। णिचि [लीलोर्नुग्लुकौ ६-३-] विलालयति – विलापयति।

(२२) ... [... ६-४-] ... [... ६-४-] ...

(२४) * ... वच्चन्ति [अत्र ...] उवाच – वग्धि। वच्यात्। उच्यात्। अवोचत्।

* [वचन्तीत्यस्य प्रयोगो ... सम्मतौ। तथा च भोजः। 'न वचन्ति प्रयुञ्जते' इति। ... अभिधानमिति केचित् इति। अत्र ... 'वचन्ति' इति सर्वाणि रूपाणि प्रदर्श्य



(६) गणकार्यानित्यत्वे तु ज्ञापकं स्रम्भ सहन इत्यत्र चुरादित्वादेव सिद्धे (विकल्पे) णिजकरणम् ॥ क्षी० पृ. १२८
अत्र गणकार्यस्यानित्यत्वज्ञापनात् श्यो लुङ् न भवति । अनित्यत्वं च स्रम्भो चुरादिपाठात् चुरादयो णिचः
इत्येव सिद्धे पुनः णिजकरणात् ज्ञापितम् भवति । आधृषाद्वा ॥ २४६ ॥ इति लिखितम् ॥

(१०) [illegible]

१) वेद — विदन्तुः । विदुः [विदो लटो वा] लिटि — विवेद — विवेदिथ । विदांचकार [उषविदजागृभ्योऽन्यतरस्याम्] विदांकुर्वन्तु । [विदांकुर्वन्त्वित्यन्यतर०] लङि. अविदुः [सिजभ्यस्तविदिभ्यश्च] अवेः [दश्च] विविदिषति [रुदविदमुषग्रहि०] इति किन् [समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः] संविन्ते । संविद्रते । वेत्तेर्विभाषा ॥ संविदते वा । संवेविन्ते । संवेविदते । आत्मनेपदवृत्ति वेत्तेः विन्त विदाते ॥

२) अस्ति । स्तः । सन्ति । [श्नसोरल्लोपः] । बभूव [अस्तेर्भूः] धातौ स्तु प्रयोगे ... आपि अस्ति ... नेष्यते इति 'प्रादुरास कुलपाञ्चालिः' ॥ स्थित । व्यतिसे ... व्यतिसे । व्यतिस्ते । व्यतिहे । तासस्त्योर्लोपः ॥

३) मार्ष्टि । मृजेर्वृद्धिः [व्रश्चभ्रस्जसृजमृज०] मृजन्ति । मार्जन्ति । मृजेरजादौ सङ्क्रमे विभाषा वृद्धिमिच्छन्ति । मार्ष्टि [वदोः कः लि] 'मृजेरजादौ' अचीत्युच्यमानेऽपि यस्मिन् विधिस्तदादावल्ग्रहणे इति आदिग्रहणं मुख्यार्थं ... दिग्रहणार्थम् । ममृज । ममार्ज ॥ ममार्जिथ, ममार्ष्ठ । अदित्वात् विकल्पः । 'मृजिर्' अमार्जीत् । अमार्क्षीत् । मिमृक्षति । मिमार्जिषति । मरीमृज्यते । मरीमार्जीति । मरीमार्ष्टि । व्यतिमार्जते । व्यतिमृजते ॥

४) रोदिति [रुदादिभ्यः सार्वधातुके] । अरोदीत् । अरोदत् [रुदश्च पञ्चभ्यः] । अड्गार्ग्यगालवयोः । अरुदत् । आरोदीत् । रुरुदिषति [रुदविद०]

५) स्वपिति [रुदादिभ्यः ०] सुष्वाप । सुषुपतुः (वचिस्वपि० लिट्यभ्यासस्योभयेषाम्) सुष्वपिथ । सुष्वाप । (रुदविद०) सुषुप्सति । सोषुप्यते (स्वपिस्यमिव्येञां यङि) सास्वपीति । स्वापयति । असूषुपत् (स्वापेश्चङि) सुप्यते । सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥

६) श्वसिति । शश्वास । शश्वसिथ । अश्वसीत् । ~~अश्वसत्~~ अश्वसत् । लुङि. अश्वसीत् । अश्वसत् [ह्म्यन्तक्षणश्वस०]

७) अनिति । आन । आनिथ । [अनितेः] प्राणिति ॥ आनीत् । आनत् । लुङि. आनीत् । आनत् ।

८) जक्षिति । बहु. जक्षति [जक्षित्यादयः षट्] [अदभ्यस्तात्] जजक्ष — जजक्षिथ । अजक्षीत् — अजक्षत् । अजक्षुः [सिजभ्यस्तविदि०] लुङि. अजक्षीत् [अतो हलादेर्लघोः] इति न वृद्धिः इडन्तत्वात् ॥ अजक्षत् । बहु. अजक्षुः ॥ जाजक्षीति । जाजक्षि ॥ अजिजक्षत् ॥

९) जागर्ति । जाग्रति । जागरांचकार [उषविदजागृभ्यो०] जजागार — जजागरिथ । जजागार — गर वा । आशि० जागर्यात् [जाग्रोऽविचिण्णल्ङित्सु] अजागरीत् [ह्म्यन्तक्षण०] जिजागरिषति । जागरयति । अजजागरत् ॥

१०) दरिद्राति । दरिद्रितः । दरिद्रति [इद्दरिद्रस्य] [श्नाभ्यस्तयोरातः] दरिद्रांचकार [कास्यनेकाच इति वक्तव्यम्] लङि. अदरिद्रुः लुङि. [अद्यतन्यां वेति वक्तव्यम्] अदरिद्रीत् । [अदरिद्रासीत्] अदरिद्रुः । दरिद्र्यात् [दरिद्रातेरार्धधातुके लोपो वक्तव्यः] दिदरिद्रिषति-दिदरिद्रासति [सनि णमुल्ण्वुल्ल्युट्सु] न दरिद्रायके लोपो दरिद्राणे च नेष्यते । दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा ॥

११) चकास्ति । चकासांचकार [कास्प्रत्ययादाम०] चकास्धि 'धि च' अन्य मतमुपदेशात् चकाद्धि] अचकात् [तिप्यनस्तेः] अचकाः [सिपि धातो रुर्वा] अचकात् (सिपि)

१२) अथ द्विकर्मकः । शास्ति । शिष्टः [शास इदङ्हलोः] शासति [जक्षित्यादयः] शशास — शशासिथ । शाधि [शा हौ] शिष्यात् । अशिषत् । [सर्तिशास्त्यर्तिभ्यश्च] शिष्यते यङि । शाशिष्टः । अशाशास्त् [नाग्लोपिशास्वृदिताम्]

१३) दीधीते । दीध्याते [एरनेकाचो०] दीध्यांचक्रे [दीधीवेवीटाम्] दीधिता [यीवर्णयोर्दीधीवेव्योः] दिदीधिषते । दीध्यति । अदिदीध्यत् ॥ अविवेवत् ॥

१४) इर्वन् 'से ह्यावाभ्यां माजौ उभौ धावन्त सौ' इति भाष्ये वार्तिकयोः सिप्तम् । इच्छा विविजिष्यन्ति ॥

अथ चत्वारः परस्मैभाषाः ॥

(१) विदँ, ज्ञाने । (२) असँ, भुवि । (३) मृजूँ, शुद्धौ । (४) रुदिँर्, अश्रुविमोचने । इत्युदात्ता उदात्तेतः ॥

अथैकः परस्मैभाषः ॥

(५) ञिष्वपँ, शये । अनुदात्तः ॥

अथ सप्त परस्मैभाषाः ॥

श्वसँ, प्राणने । (६) अनँ, च । (७) जक्षँ, भक्षहसनयोः । (८) जागृ, निद्राक्षये । (९) दरिद्रा, दुर्गतौ । (१०) चकासृँ, दीप्तौ । (११) शासुँ, अनुशिष्टौ । इत्युदात्ताः ।

अथ द्वावात्मनेभाषौ ॥

(१२) दीधीङ्, दीप्तिदेवनयोः । वेवीङ्, वेतिना तुल्ये । इत्युदात्तौ ॥

(१) लटि–विदो लटो वा । ३ । ४ । ८३ । लोटि–विदांकुर्वन्त्वित्यन्यतरस्याम् । ३ । १ । ४१ । तनादिकृञ्भ्य उः । ३ । १। ७९। अत उत्सार्वधातुके । ६ ।४। ११० । लङि–दश्च ।८ ।२। ७५। (२) श्नसोरल्लोपः ।६ ।४। १११ । आर्द्धधातुके–अस्तेर्भूः । २ । ४।५२। लोटि–घ्वसोरेद्धावभ्यासलोपश्च। ६।४। ११९। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८ । ३ । ८७ । (३) मृजेर्वृद्धिः ।७।२। ११४। इष्टिः–इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते । १ । १ । ३ । (४) रुदादिभ्यः सार्वधातुके । ७ । २ ।७६। लङि–रुदश्च पञ्चभ्यः ।७ ।३।९८ । अड्गार्ग्यगालवयोः । ७ ।३। ९९ ।(५) सुविनिर्दुर्भ्यः सुपिसूतिसमाः । ८ । ३ । ८८ । वा०–पूर्वत्रासिद्धीयमद्विर्वचने । (६) अनितेः । ८ ।४। १९ । (७) जक्षित्यादयःषट् । ६ । १ ।६। अदभ्यस्तात् । ७ । १ । ४ । (८) जाग्रोऽविचिण्णल्ङित्सु । ७ ।३। ८५। लङि–जुसि च ।७। ३। ८३ । (९) इद्दरिद्रस्य । ६ । ४ । ११४ । श्नाभ्यस्तयोरातः । ६। ४ । ११२ । वा०–दरिद्रातेरार्द्धधातुके लोपो वक्तव्यः । वा०–अद्यतन्यां वेति वक्तव्यम् । (१०) लङि–तिप्यनस्तेः । ८ । २ । ७३ । सिपि धातोरुर्वा । । ८ । २ । ७४ । (११) शास इदङ्हलोः ।६ । ४ ।३४। लोटि–शा हौ । ६ । ४ । ३५। (१२) यीवर्णयोर्दीधीवेव्योः । ७ ।४। ९३ ।

अथ त्रयः परस्मैभाषाः ॥

षस[15], सस्ति[16], स्वप्ने । वश[17], कान्तौ । इत्युदात्ताः । चर्करीतं च ॥

अथैक आत्मनेभाषः ॥

ह्नुङ्[18], अपनयने । इत्यनुदात्तः ।

इति लुग्विकरणा अदादयः ॥

अथ जुहोत्यादिर्गणः

अथ त्रयः परस्मैभाषाः ॥

(१) हु[1], दानादनयोः । आदाने चेत्येके । प्रीणनेऽपीतिमहाभाष्यसम्मतम् । (२) ञिभी[2],भये । ह्री[3], लज्जायाम् । जुहोत्यादयोऽनुदात्ताः ।

अथैकः परस्मैभाषः । [अल्पदक्षे करोतिवत् सर्वरूपाणि ...]

(३) पॄ[4], पालनपूरणयोः उदात्तः । ह्रस्वान्तोऽयमित्येके ।

अथैक उभयतोभाषः ।

(४) डुभृञ्[5], धारणपोषणयोः । अनुदात्तः ॥

अथ द्वावात्मनेभाषौ ।

(५) माङ्[6] माने शब्दे च । ओहाङ्, गतौ ।

अथैकः परस्मैभाषः ।

(६) ओहाक्, त्यागे । अनुदात्तः ॥

(१) जुहोत्यादिभ्यः श्लुः । २ । ४ । ७५ । श्लौ । ६ । १ । १० । बहुलं छन्दसि । २ । ४ । ७६ । भीह्रीभृहुवां श्लुवच्च । ३ । १ । ३९ । (२) भियोऽन्यतरस्याम् । ६ । ४ । ११५ । (३) अर्त्तिपिपर्त्योश्च । ७ । ४ । ७७ । उदोष्ठ्यपूर्वस्य । ७ । १ । १०२ । लिटि—शॄदॄप्रां ह्रस्वो वा । ७ । ४ । १२ । (४) भृञामित् । ७ । ४ । ७६ । (५) ईहल्यघोः । ६ । ४ । ११३ । (६) जहातेश्च । ६ । ४ । ११६ । लोटि—आ चहौ । ६ । ४ । ११७ । विधिलिङि—लोपो यि । ६ । ४ । ११८ ।

लोटि (सान्धि - संस्तात । संस्तकम् । संस्त । संस्तानि । संस्ताव । संस्ताम
लङि । असस्न । असंस्ताम् । असंस्तान । असंस्तम । संस्तात । असंस्तीत ।
... । ... । लालं (स्त) । असासंस्तीत
अससस्त । संस्तयति । अससंस्तत् ॥ —

(१२) सास्ति - सास्से । ससास - सेसिथ । लोटि - सधि - सद्धि । असत् - असः - असत् ।

(१३) संस्ति । संस्तः । संस्तन्ति । ससंस्त । ससंस्तिथ । [संधि । संस्तः । संस्तन्ति । कदा० अदि०) । संस्ति । संस्तः । संस्ति ।
संस्ति । संस्तः । संस्तः । ४

(१४) वष्टि: । उष्टः । उशन्ति । उवाश - उवशिथ । उड्ढि । अवट् - औश्याम् - औशन् । वावश्यते (न वशः)

(१५) अपह्नुते - जह्नुविद्वे । जुह्नुविध्वे ।

(१) जुहोति - जुह्वति । हुश्नल्वो । सार्वधातुके । जुहाव । जुहविथ - जुहोथ । जुहवांचकार [भीह्रीभृहुवां०] जुहुधि [हुझल्भ्यो
हि] हावयति । अजूहवत ॥ ओ ह्वति (हुश्नुवो० इति न ... ...)
(२) बिभेति । बिभीतः । बिभ्यति । बिभीथः - बिभिथः । (भियोऽन्यतरस्याम्) बिभाय - बिभयिथ - बिभेथ । बिभयांचकार ।
लङि । अबिभयुः । जुसि चेति गुणः ॥ बेभयीति । बेभेति - बेभीतः - बेभितः - (भियोऽन्यतरस्याम्) ॥
(भीस्म्योर्हेतुभये) (बिभेते र्हेतुभये) भियो हेतुभये षुक् । भीषयते । अबीभिषत । भापयति । भाययति ॥
(३) जिह्रेति बिभेतिवत् । जिह्रियति । ह्रेपयति (अर्तिह्री० ...)
(४) पिपर्ति (अर्तिपिपर्त्योश्च) पिपूर्तः । पिपुरति (उदोष्ठ्यपूर्वस्य) (हलि च) पपार - पप्रतुः - पप्रुः । पपरतुः
(ऋच्छत्यृताम्) (शॄदॄप्रां ह्रस्वो वा) पपरिथ । परिता - परीता (वॄतो वा) पिपूर्यात् । अपारीत् । पिपूर्षति -
पिपरिषति - पिपरीषति (इट् सनि वा) पोपूर्यते । पापरीति - पापूर्तः । पारयति - अपीपरत् ।
(५) बिभर्ति । भृञामित् । बभर्थ । बिभरांचकार । बिभृयात् । बुभूर्षति । ~~...~~ । (सनि बेभ्रीयते) बरीभर्ति
(६) मिमीते । मिमाते । मिमते । ममे । मेमीयते ।
(७) जिहीते । जिहाते । हापयति । अजीहपत् ।
(८) जहाति । जहितः । जहीतः । (जहातेश्च) जहाय । जहिथ । जहाहि । जहीहि (आ च हौ) (जह्यात
(लोपो यि) हेयात् (एर्लिङि) अहासीत् (यमरमनमातां सक् च) जेहीयते । हापयति । अजीहपत् ॥

(आङो दोऽनास्यविहरणे) आदत्ते। [आस्य विहरण समान क्रियादपि प्रति देशो वाच्यः] (स्वाङ्गकर्मकाच्चेति वक्तव्यः) (ददद् ...) लौलोले दिवा।

(1) ददाति। दत्त - ददति (श्नाभ्यस्तयोरातः) (अदभ्यस्तात) ददौ। ददिथ - ददाथ। देहि (घ्वसोरेद्धावभ्यासलोपश्च) देयात् - अदात्। (गातिस्थाघुपाभूभ्यः०) दत्ते। ददाते। ददते। ददिषे। ददीत। दासीष्ट। अदित (स्थाघ्वोरिच्च) दित्सति (सनि मीमाघु०) देदीयते (घुमास्थागापाजहातिसां०) दापयति। दाप्यतः॥ दापयति। अदीदपत्॥

(2) दधाति। धत्तः। धेहि। धत्ते। दधाते। धत्स्व। अधित। धित्सति। देधीयते। लोट् [दधद् दधति] (लोलोले दिवा)

(3) नेनेक्ति (निजां त्रयाणां गुणः श्लौ) निनेजिथ। अनिजत् (इरितो वा) अनैक्षीत्। नेनिक्ते। निनिजिषे। अनिक्त (लिङ्सिचावात्मनेपदेषु०)

(4) वेवेक्ति। नेनेक्तिवत्,

(5) वेवेष्टि। विवेषिथ। वेक्ष्यति (षढोः कः सि) वेवेष्टु (अवेवेट्) अविक्षत्। अविक्षत (शल इगुपधा० पुषादि भुतां०) अलृदित्करणं प्रपञ्चार्थं अयाणं नित्यमेव तत्फलस्य सिद्धत्वात्॥

(6)

(6) घर्तिरस्त्वै आवश्यकेण पठितेऽप्यूतं घृणा घर्म इत्ये ... ॥ धा.6-1-48॥ जिघर्ति॥ नैरुक्ता अपि नैगमेभ्यो भाविकाभावन्ते॥ [जिघर्मीति नलावृतेन] ॥ निरु०।

(6) जिहर्ति (अर्ति जिहर्ति होमात) (हृग्रहोर्भश्छन्दसि हस्य भत्वम्) जभार। जिहर्ति॥

(7) अर्तेश्छान्दसत्वात् दिधर्ति इत्यादौ 'बहुलं छन्दसि' इतीत्वे सिद्धे पुनः "अर्तिपिपर्त्योश्च" इति इत्व विधानं भाषायामप्यस्य प्रयोगोऽस्तीति ज्ञापनार्थं मिति वदता भाष्यकारेण पदमर्थः स्फोरितः। धा. वृ. पृ. 268

10) इयर्ति - इयृतः। इयृति (अर्तिपिपर्त्योश्च) (अभ्यासस्याऽसवर्णे) आर - आरिथ (ऋतद्वदृताम्) (इडत्यर्तिव्ययतीनाम्) लङि - ऐयः। ऐयृताम् - ऐयरुः। इयृयात्। अर्यात्। (गुणोऽर्तिसंयोगाद्योः) आरत् (सर्तिशास्त्यर्तिभ्यश्च) (ऋदृशोऽङि) [समो गम्-ऋच्छिभ्यां] समृत॥

(8) 'कपिर्बिभर्ति ते जगत्) बभ्रा ते हरिः (भलिभर्ती ह लिय)

(9) चिकेति। चिकितः। चिक्यति।

(10) तुतोर्ति। तुतूर्तः। तुतरति।

(11) दिधेष्टि। दिधिष्टः।

(12) दधन्ति। दधन्तः। दधनति।

(13) जजन्ति। जजातः। जज्ञति (जन सन खनां सञ्झलोः) (गम हन जन खन०) लोटि। जजाहि। जाह्दलि। जजन्ति"

(14) देवान् जिगाति। जिगीतः। जिगति॥ जिगी:

(1) दीव्यति। दिदेव। दिदेविथ। दिदेविषति। दिदिविषति। दुद्यूषति। देदीव्यते। अध्यावितांनास्ति यङ्लुक्"

(2) सीव्यति। दीव्यतिवत्॥

(3) स्रीव्यति। दीव्यतिवत्। ...

(4) ष्ठीव्यति। तिष्ठेव। [सुब्धातुष्ठिवुष्वष्कतीनां सत्व०]

(5)

अथ द्वावुभयतोभाषौ ॥

(१) डुदाञ्, दाने । (२) डुधाञ्, धारणपोषणयोः । दानेऽपीत्येके । अनुदात्तौ ।

अथ त्रय उभयतोभाषाः ॥

(३) णिजिर्, शौचपोषणयोः । विजिर्, पृथग्भावे । विष्लृ, व्याप्तौ । इति णिजादयोऽनुदात्ताः ॥

अथ गणान्ताः परस्मैभाषाश्छान्दसाश्चैकादश ॥

(४) घृ, क्षरणदीप्त्योः । (५) हृ, प्रसह्यकरणे । ऋ, सृ, गतौ । इति घ्रादयस्त्रयोऽनुदात्ताः ॥

(६) भस, भर्त्सनदीप्त्योः । उदात्त उदात्तेत् । कि, ज्ञाने । अनुदात्तः । तुर, त्वरणे । धिष, शब्दे । धन, धान्ये । (७) जन, जनने । तुरादय उदात्ता उदात्तेतः । गा, स्तुतौ अनुदात्तः । छन्दसि वृत् ।

इति श्लुविकरणा जुहोत्यादयः ॥

अथ दिवादिगणः ॥

अथ दिवादयः षड्विंशतिः परस्मैभाषाः ॥

(८) दिवु, क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । षिवु, तन्तुसन्ताने । स्रिवु, गतिशोष-

(१) घोर्लोपो लेटि वा ।७ ।३। ७०। (२) दधस्तथोश्च ।८। २ । ३८ । वा०–पूर्वत्रासिद्धे नस्थानिवत् ।(३) निजां त्रयाणां गुणः श्लौ ।७।४।७५। नाभ्यस्तस्याचिपिति सार्वधातुके ।७ ।३।८७। (४) बहुलं छन्दसि । ७ । ४। ७८ । (५) वा०–हृग्रहोर्भश्छन्दसि हस्य भत्वम् । (६) घसिभसोर्हलि च । ६ । ४ । १००। (७) जनसनखनां सञ्झलोः ।६ ।४। ४२ । लेटि–वाच्छन्दसि । ३।४। ८८ । (८) दिवादिभ्यः श्यन् । ३ । १ । ६९ ।

क्षयोः । ष्ठिवु, निरसने । क्सुँ, अदने । आदान इत्येके । अदर्शन इत्यपरे । ष्णसुँ, निरसने । क्नसु, ह्वरणदीप्त्योः । व्युष, दाहे । प्लुष, च (१)। नृती, गात्रविक्षेपे। त्रसी, उद्वेगे । कुथ, पूतीभावे । पुथ, हिंसायाम् । गुध, परिवेष्टने । क्षिप, प्रेरणे । अनुदात्तः । पुष्प, विकसने । तिम, ष्टिम, ष्टीम, आर्द्रीभावे । व्रीड, चोदने लज्जायाञ्च । इष, गतौ । षह, षुह, चक्यर्थे । जॄष्, झॄष्, वयोहानौ । इति दिवादय उदात्ता उदात्तेतः ॥

अथ द्वावात्मनेभाषौ ॥

षूङ्, प्राणिप्रसवे । दूङ्, परितापे । इत्युदात्तौ ॥

अथ दीङादय एकादश आत्मनेभाषाः ॥

(२) दीङ्, क्षये । डीङ् विहायसा गतौ । धीङ्, आधारे । मीङ्, हिंसायाम् । रीङ्, स्रवणे। (३) लीङ्, श्लेषणे । व्रीङ्, वृणोत्यर्थे । (वृत्) स्वादय ओदितः । पीङ्, पाने । माङ्, माने । ईङ्, गतौ। प्रीङ्, प्रीणने। इति दीङादय अनुदात्ता डीङ् तूदात्तः ॥

अथ चत्वारः परस्मैभाषाः॥

(४) शो, तनूकरणे । छो, छेदने । षो, अन्तकर्मणि । दो, अवखण्डने । श्यतिप्रभृतयोऽनुदात्ताः ॥

अथ पञ्चदशात्मनेभाषाः ॥

(५) जनी, प्रादुर्भावे। दीपी, दीप्तौ । पूरी, आप्यायने ।

(१) सेऽसिचिकृतचृतछृदतृदनृतः ।७।२।५७। (२) दीङो युडचि क्ङिति।६।४।६३। मीनातिमिनोतिदीङां ल्यपि च ।६।१।५०। (३) विभाषा लीयतेः ।६।१।५१। (४) ओतः श्यनि ।७।३।७१। (५) ज्ञाजनोर्जा ।७।३।७९। जनिवध्योश्च ।७।३।३५।

(५) स्नुस्यति। सुष्णोस्थ। स्नोष्णुस्यते।
(६) स्नस्यति। सस्नास।
(७) क्नस्यति। चक्नास। क्रसयति। अचिक्रसत्। (जनीजृष् क्नसु रञ्जोऽमन्ताश्च)॥
(८)
(९) रध्यति। ररन्धिथ। रत्स्यति। [नेड्वशि कृति ...] ररीरध्यते (भृशादित्वात्)

(१२) अचिक्लिशत्।

(१६)
(१८) तेतिम्यति। तेतेम्यति।

(२१) क्षुधिता (नीप इत्यस्य नात्यस्य ग्रहणं)
(२२) क्षुहिता (नीप क्षुद् इत्यस्य क्षुध्यशब्दस्य ग्रहणं)

(२४) जीर्यति। जजरतुः (ऋच्छत्यृताम्) वा जॄभ्रमु०। जेरतुः। जेरुः। जरयति। जनीजृष्क्नसु०॥
(१) सोष्यति। सविष्यते। (स्वरति सूति सूयति०) सुसूयते।
(३) (दीङः प्रतिषेधः स्थाघ्वोरित्वे) दिदीयते॥ दापयति।

(६) मिमीयते। मिलते केचित्॥
(७) रीयिषे [... इति मतः (अचिर्ऋ अहि ...) इत्यसिद्धत्वात् उपधायां च इति दीर्घो न भवति] रेपयति। (अर्त्तिह्री०)
(८) लाता। लेता (विभाषा लीयतेः) विलालयति। विलीनयति। विलापयति। विलाययति (लीलोर्नुग्०)

(११) मयते - मिमीते वत् वा॥
(१३) व्राययति जुकुम्मयति (चुक्ली...) इत्यस्य अकारान्तत्वात्॥
(१४) अघ्रात। अघ्रासीत् [विभाषा घ्राधेट्०॥ घ्रापयति।
(१६) स्रेजीयते (भृशादित्वात्)

(१८) जायते। जज्ञे (गमहन०) अजनि। अजनिष्ट (दीपजन०) अजनिषत। जाजायते। जञ्जन्यते। जञ्जनीति। जनयति (कृत्संयुक्तस्य०) (जनीजृष्क्नसु०)
(१९) अदीपि। अदीपिष्ट। (दीपजन०) दीपयति। अदीदिपत्। अदिदीपत् (भ्राजभास०)
(२०) अपूरि। अपूरिष्ट। अपोपूर्यत - अपीपरत्। पूरयति।
2

उद्गिरणे। ष्णिहँ, प्रीतौ। वृत् रधादयः। (१) शमुँ, उपशमे, तमुँ, काङ्क्षायाम्। दमुँ, उपशमे। श्रमुँ, तपसि खेदे च। भ्रमुँ, अनवस्थाने। क्षमूँ, सहने। क्लमुँ, ग्लानौ। मदीँ, हर्षे। इत्यष्टौ शमादयः। (२) असुँ, क्षेपणे। (३) यसुँ, प्रयत्ने। जसुँ, मोक्षणे। तसुँ उपक्षये। दसुँ च। वसुँ, स्तम्भे। बशादिरित्येके। ओष्ठ्यादिर्दन्त्यान्तो व्युसइत्यन्ये। अयकारं बुस इत्यपरे। व्युषँ, विभागे। प्लुषँ, दाहे। विस प्रेरणे। कुसँ, संश्लेषणे। बुसँ, उत्सर्गे। मुसँ, खण्डने। मसीँ, परिणामे। समीँ इत्येके। लुठँ, विलोडने। उचँ, समवाये। भृशुँ, भ्रंशुँ, अधःपतने। वृशँ, वरणे। कृशँ, तनू करणे। ञितृषँ, पिपासायाम्। हृषँ, तुष्टौ। रुषँ, रिषँ, हिंसायाम्। डिपँ, क्षेपे। कुपँ, क्रोधे। गुपँ, व्याकुलत्वे। युपुँ, रुपुँ, लुपुँ, विमोहने। लुभँ, गार्ध्ये। क्षुभँ, संचलने। णभँ, तुभँ, हिंसायाम्। क्लिदूँ, आर्द्रीभावे। (४) ञिमिदाँ, स्नेहने। ञिक्ष्विदाँ, स्नेहनमोचनयोः। ऋधुँ, वृद्धौ। गृधुँ, अभिकांक्षायाम्। वृत्। इत्युदात्ता उदात्तेतः। दिवादिराकृतिगणः।

इति श्यन्विकरणा दिवादयः॥

अथ स्वादिर्गणः॥

अथ स्वादयो दशोभयतोभाषाः॥

(५) षुञ्, अभिषवे। षिञ् बन्धने। शिञ् निशाने।

(१) शमामष्टानांदीर्घःश्यनि।७।३।७४। (२) लुङि—अस्यतेस्थुक्।७।४।१७। (३) यसोऽनुपसर्गात्।३।१।७१। संयसश्च।३।१।७२। (४) मिदेर्गुणः।७।३।८२। (५) स्वादिभ्यः श्नुः।३।१।७३। सुनोतेःस्यसनोः।८।३।११७।

(२३। अशमि–अशामि०॥ शमोऽदर्शने॥

(२५) दमयति–दमयते (न पादम्या०)

(२८) भ्राम्यति भ्रमति (वा भ्राशभ्लाश०)

( ) अक्षमीत्–अक्षामीत्॥

(२९) क्लाम्यति। क्लामति।

(३०) मदयति (मदी हर्षग्लेपनयोः) मादयति।

(३२) यमोऽपरिवेषणे। यमयति। यमति।

(५८) गुपयति। गोपायति।

(६१) जीव सह भूम (नय०)

(६२) अर्दि जर्दति। इत्सति। [सनीवन्त०] (आप्ज्ञप्यृधामीत्) अर्दिधत्। अर्दीधत्॥

वृत्करण पुग्गादिघर्य तस्मात्–स्फायति। स्फेवमामेर/स्फेटयति॥

(१) सुन्वन्ति (हुश्नु: सार्वधातुके) सुनुवः–न्व, सुनुमः–न्मः॥ (लोपश्चास्यान्यतरस्यां म्वोः॥ (अभिषुणोति) ॥उपसर्गात् सुनोति०॥ अभिषुषाव (स्थादिष्वभ्यासेन०) अभिषोष्यति (सुनोते स्यसनोः) उपसर्गात् इति प्राक् निषेधः। लुङ् (असावीत्) स्तुसुधूञ्भ्यः परस्मै० इति इट्॥ सुषु विष्ठे–ष्वे। विषावेरः। सोमीजूषः। इनः पीवनः॥

(२) चिणव, स्वनेकाचोऽत्यगोन०।

अथ तुदादिर्गणः ॥

अथ षडुभयतोभाषाः ।

(१) तुद, व्यथने । णुद, प्रेरणे । दिश, अतिसर्जने । (२) भ्रस्ज, पाके । क्षिप, प्रेरणे । कृष, विलेखने । इत्यनुदात्ताः स्वरितेतः ।

अथैकः परस्मैभाषः ।

ऋषी, गतौ । उदात्त उदात्तेत् ।

अथ चत्वार आत्मनेभाषाः ।

जुषी, प्रीतिसेवनयोः । (३) ओविजी, भयचलनयोः । ओलजी, ओलस्जी, व्रीडायाम् । इत्युदात्ता अनुदात्तेतः ।

अथ व्रश्चादयश्चतुर्दशोत्तरशतं परस्मैभाषाः ।

ओव्रश्चू, छेदने । व्यच, व्याजीकरणे । उछि, उञ्छे । उछी, विवासे । ऋछ, गतीन्द्रियप्रलयमूर्त्तिभावेषु । मिछ, उत्क्लेशे । जर्ज, चर्च, झर्झ, परिभाषणभर्त्सनयोः । त्वच, संवरणे । ऋच, स्तुतौ । उब्ज, आर्जवे । उज्झ, उत्सर्गे । लुभ, विमोहने । रिफ, कत्थनयुद्धनिन्दाहिंसादानेषु । रिह, इत्येके । तृप (४) तृम्प, तृप्तौ । तृफ, तृम्फ, इत्येके । तुप, तुम्प, तुफ, तुम्फ, हिंसायाम् । दृफ, दृम्फ, उत्क्लेशे । दृभ, इत्यन्ये । ऋफ, हिंसायाम् । गुफ, गुम्फ, ग्रन्थे । उभ, उम्भ, पूरणे । शुभ, शुम्भ, शोभार्थे । दृभी, ग्रन्थे । चृती, हिंसाग्रन्थनयोः ।

(१) तुदादिभ्यःशः । ३ । १ । ७७ । (२) भ्रस्जोरोपधयोरमन्यतरस्याम् । ६ । ४ । ४७ । (३) विज इट् । १ । २ । २ । (४) वा०-शे तृम्फादीनां नुम्वाच्यः

(४) भृज्जति (ग्रहिज्या०) बभर्ज । बभर्ष्ठ । बभर्जिथ । [भ्रस्जो रोपधयोः रमन्य०) बभ्रज्ज । बभ्रज्जतुः । (बभ्रज्जिथ)
बिभर्क्षति । बिभर्ज्जिषति । बिभ्रक्षति । बिभ्रज्जिषति [सनीवन्तर्ध भ्रस्ज०) बरीभृज्ज्यते [रीगृदुपधस्य च] बाभ्रष्टि
(ग्रहि०) इत्यत्र श्तिपा निर्देशात् न सम्प्रसारणम् ॥ भर्ज्यति । अबभर्ज्जत् । अबभ्रज्जयति । अबभ्रज्जत ॥

(६) (अनुदात्तस्य चर्दुपधस्यान्य०) क्रष्टा । क्रष्टा इत्यादि ॥ लुङि । अकृक्षत् । अक्राक्षीत् । अकार्क्षीत् [स्पृशमृशकृष०)

(७) अर्चयति । आर्चिचत् । मा भवान् अर्चिचत् ॥

(८)

[स्वरतिसूति०]

(१२) वृश्चति (ग्रहिज्या०) वव्रश्चिथ । वव्रष्ठ । वरीवृश्च्यते । वाव्रष्टि । वाव्रष्ट । श्तिपा निर्देशात् न सम्प्रसारणम् ।

(१३) विचति (ग्रहिज्या०) [व्यचेः कुटादित्वमनसीति वक्तव्यम्] इति विव्यचिथ ॥ वेविच्यते । वाव्यक्ति ।
तत्रत्यशेषकृती/निरूपणादयः । तत्रत् व्यचिता इत्येवमादयः सिद्ध्यन्ति ॥

(१६) आनर्च्छ । आनर्छतुः (अत आदेः) (तस्मान्नुड्द्विहलः) इत्यत्र द्विहल्ग्रहणमनेकहलुपलक्षणार्थम् इति नुडागमः इति
(स्तोगादिमर्च्छिभ्याम्) समृच्छते ॥

(२२) (अर्चिचत्)

(२३) येषां मतेऽयं रोपधः (वकारस्यान्ययं प्रतिषेधो वक्तव्यः) नैतद्वार्तिकं पठितव्यम् । परन्तु वकारोपधिनः पठन्ति
(उब्जिजिषति)

(२४) अयमपि रोपधः । उब्जिजिषति ॥

(२५) लोभिता । लोब्धा । (तीषसहलुभ०)

(२६) (स्पृशमृश..कृष०) अतर्पीत् । अत्राप्सीत् । अतार्प्सीत् ।

(२८) तृम्फति ॥

~~वकारस्यान्ययं प्रतिषेधो वक्तव्यः~~ ।

(४६) चरिष्यति । चस्कन्दति । सेऽसिचि०



(६३) कुर्यात । 'कुर्यात' इत्यत्रापि 'हलि' दीर्घो भवति (न भकुर्छु०) इति करोते ग्रहणात् । इति मतं प्रजमे । तत्र हि (लक्षण प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् इत्यस्य इत्यन्तस्यैव ग्रहणम् न कुर्यात्भाषितस्य । कुर्यात् [illegible] यदि भाषा नाशब्देन तदापि कृञो देव ग्रहणं स्याद् इति ॥

(७७) (स्वरति सूति०) ववर्हिथ । ववढ । अवर्हीत् । अवृक्षत ।
(८२) (स्वरति०) इति र्हवते ।

(७४) ततृंहिथ । ततृण्ढ ॥ तृंहिता । तृण्ढा ॥

(७५) इच्छति (इषुगतौ०) एषिता । एष्टा (तीषसह०) [illegible]
(७ इ ॥ इषु गतौ । पाठेऽनार्ज इच्छतः आह - इषे इच्छत्वमित्याहि कैयटः । इषु गतौ इति पाठे तौदादिकस्यैव उदितः पाठादन्यत्र ग्रहणाशङ्कैव नेत्यत आह ... गणेऽपि अनुदित एव पाठ इत्यर्थः ॥

(८०) चलयति (चल कम्पने)
विलं मूषकानां (जसर्ग. क विप्लानम् ।
सलं [illegible]

अवड् सम्मत मेतत् - तस्मात् अयं प्रयोगः
[illegible]: "लङ्गा पूर्वको [illegible]"
अनक्ष [illegible] ॥

(८५) कुटादादिः कुटादि इति ग्रहणात् लिखिता । लिखिष्यति इत्यपि भवति ॥ लेखिता । लेखिष्यति [illegible] ।
(९७) गाङ्कुटादिभ्योऽञ्णिन्ङित् । चुकुटिथ इत्यवस्था अ [illegible] यदे प्राप्ते 'जति इव जिगमन' इति विग्रहणेन [illegible]
Sनहो कस्तु कैयटे ऽपर वक्ष्ये :—

(१०४) [illegible] । अकोडीत् । ? [illegible] - [illegible] ।२

(१११) [illegible]

(१०६) कुडी — [illegible]

(११५) स्फोरयति । स्फारयति (चिस्फुरोर्णौ)

